# Shri Yadugirinrisimhasuprabhatamangalam

# શ્રીયદુગિરિનૃસિંહસુપ્રભાતમઙ્ગલમ્

## Document Information

Text title : Shri Yadugirinrisimhasuprabhatamangalam

File name : yadugirinRRisiMhasuprabhAtamangalam.itx

Category : vishhnu, dashAvatAra, mangala, suprabhAta, viShNu

Location : doc_vishhnu

Proofread by : M K Barman

Description/comments : nRRisiMhakosha 2 upAsanA khaNDa

Latest update : August 4, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 4, 2025

*sanskritdocuments.org*

# શ્રીયદુગિરિનૃસિંહસુપ્રભાતમઙ્ગલમ્

શ્રીમન્ સંયમિ સાર્વભૌમ ભગવન્ રામાનુજાર્યપ્રભો ।
યાતા રાત્રિરુપાગતં શિવમહસ્તેજોનિધે જાગૃહિ ।
શ્રીમદ્યાદવ શૈલનિત્યવસતે શ્રીભાષ્યકારશ્રિયા ।
ક્ષેમં રઙ્ગવૃષાદ્રિ હસ્તિયદુશૈલાદ્યેષુ સંવર્ધય ॥ ૧॥

કૌસલ્યાસુપ્રજારામ પૂર્વાસન્ધ્યા પ્રવર્તતે ।
ઉત્તિષ્ઠ નરશાર્દૂલ કર્તવ્યં દૈવમાહ્નિકમ્ ॥ ૨॥

ઉત્તિષ્ઠોત્તિષ્ઠ ગોવિન્દ ઉત્તિષ્ઠ ગરુડધ્વજ ।
ઉત્તિષ્ઠ કમલાકાન્ત ત્રૈલોક્યં મઙ્ગલં કુરુ ॥ ૩॥

યોગાનન્દ નૃસિંહદેવ ભગવન્ શ્રીયાદવાદ્રીશ્વર
પ્રહ્લાદાર્ચિત પઞ્ચભાગવતદૃક્ સમ્મોદદાયિન્ હરે ।
શ્રીરામાનુજરક્ષકારિવિજયિન્ ત્રાતશ્વર વિશ્વં સદા
સાલગ્રામતનોઃ સુદર્શનસુખં શ્રીસુપ્રભાતં પ્રભો ॥ ૪॥

શ્રી સૈન્યનાયક પરાઙ્કુશનાથ સૂરિ
પદ્માક્ષ રામ યમુનાડયે સુપૂર્ણવર્યૈઃ ।
શ્રીલક્ષ્મણાખિલવરાર્થ મદાર્યમુખ્યૈઃ
નિત્યાર્ચિતાખ્રિક વિભો તવ સુપ્રભાતમ્ ॥ ૫॥

લક્ષ્મીશ કેશવ હરે નૃહરે મુરારે
શૌરે રમારમણકારણ દીનબન્ધો ।
ઇત્યાદરેણ વદતામિહ વાઞ્છિતાર્થ
શ્રીમન્ નૃસિંહ જગદીશ્વર સુપ્રભાતમ્ ॥ ૬॥

જય જય નરસિંહ નારાયણાનન્ત તુભ્યં નમો
જય જય ભુજગેન્દ્રશાયિન્ સુખં યોગનિદ્રાડસ્તુ તે ।
જય જય સુપ્રભાતા નિશાસ્તુ પ્રસીદ પ્રભો

જય જય કરુણાનિધે જાગૃહિ શ્રીપતે જાગૃહિ ॥ ૭॥

માણિક્યાદિ સમપ્રભં નિજરુધા સન્ત્રસ્તરક્ષોગણં
જાનુન્યસ્તકરામ્બુજં ત્રિનયનં રત્નોલ્લસદ્ભૂષણમ્ ।
બાહુભ્યાં ધૃતશઙ્ખચક્રમભયં દંષ્ટ્રાયવક્રોલ્લસત્
જ્વાલાજિહ્વમુદગ્રકેશમનિશં વન્દે નૃસિંહં વિભુમ્ ॥ ૮॥

માધવ મુકુન્દ મધુસૂદન મુરારે
વામન નૃસિંહ શરણં ભવનતાનામ્ ।
પાલય કૃપાલય ભવામ્બુધિનિમગ્નં
દૈત્યવરકાલ નરસિંહ નરસિંહ ॥ ૯॥

ઇન્દુરવિપાવકલોચન । મહાભુજ સશઙ્ખવરચક્ર ॥

રાજદરવિન્દ રુચિરં પદયુગં તે ।
હિ મમ મૂર્ધ્નિ નરસિંહ નરસિંહ ॥ ૧૦॥

જય જય ભગવન્ પ્રસીદ પ્રપન્નાર્તહારિન્ હરે
વિરમતુ તવ યોગનિદ્રા વિનિદ્રારવિન્દોપમામ્ ।
મયિ વરદ નિધેહિ દૃષ્ટિં સમુત્તિષ્ઠ શય્યાતલાત્
ફણિપતિમધિતિષ્ઠ ભદ્રાસનં ભદ્રમેવાસ્તુ તે ॥ ૧૧॥

આસેદુષા યદુગિરિં ક્રિમિકણ્ઠહેતોઃ
રામાનુજેન બહુશઃ પરિશોધિતાની ।
આવિર્ભવન્તુ કુશિકાન્વયસૌમ્યસિંહ
સૂરિપ્રિયસ્ય નૃહરે તવ મઙ્ગલાનિ ॥ ૧૨॥

ઇતિ શ્રીયદુગિરિનૃસિંહસુપ્રભાતમઙ્ગલં સમ્પૂર્ણમ્ ।

Proofread by M K Barman

*Shri Yadugirinrisimhasuprabhatamangalam*
pdf was typeset on August 4, 2025

Please send corrections to *sanskrit@cheerful.com*